च्छदा । अथ स्वल्पफला काककर्कटी स्वादुमस्तका । पिण्डखर्जूरिका त्वन्या सा देशे पश्चिमे भवेत् । खर्जूरी गोस्तनाकारा परद्वीपादिहागता । जायते पश्चिमे देशे सा छोहारेति कीर्त्तिता । खर्जूरीत्रितयं शीतं मधुरं रसपाकयोः । स्निग्धं रुचिकरं हृद्यं क्षतक्षयहरं गुरु । तर्पणं रक्तपित्तघ्नं पुष्टिविष्टम्भशुक्रदम् । कोष्ठमारुतकृद्बल्यं वान्तवातकफापहम् । ज्वराभिघातक्षुत्तृष्णाकासश्वासनिवारणम् । मदमूर्च्छामरुत्पित्तमद्योद्भूतगदान्तकृत् । महतीभ्यां गुणैरल्पा स्वल्पखर्जूरिका स्मृता । खर्जूरीतरुतोयन्तु मदपित्तकरं भवेत् । वातश्लेष्महरं रुच्यं दीपनं बलशुक्रकृत्" भावप्र० ।

**भूमिचम्पक** पु०भूमिलग्नः चम्पकः शाक०त०(भूइचांपा) वृक्षभेदे शब्दच० ।

**भूमिज** पु० भूमेर्जायते जन-ड । १मङ्गलग्रहे २नरकासुरे मेदि० ३भूमिकदम्बे ४मनुष्ये च राजनि० । ५भूमिजातमात्रे त्रि० । ६सीतायां स्त्री ।

**भूमिजगुग्गुलु** पु० कर्म० । आशापुरजाते गुग्गुलौ राजनि० ।

**भूमिजम्बु** स्त्री ७त० । क्षुद्रजम्ब्वां रत्नमा० वा कङ् तत्रार्थे राजनि० । स्वार्थे क । तत्रार्थे स्त्री अमरः ।

**भूमिजीविन्** पु० भूमिं तत्कर्षणं जीवति जीव–णिनि । वैश्ये शब्दरत्ना० ।

**भूमिञ्जय** पु० विराटनृपस्य पुत्रभेदे भा० वि० ३५ अ० ।

**भूमिधर** पु० भूमिं धरति धृ–अच् । १कुलपर्वते उपचारात् २पर्वतमात्रे । [द्योऽप्यत्र ।

**भूमिप** पु० भूमिं पाति पा–क । नृपे जटा० । भूमिपाला-

**भूमिपक्ष** पु० भूमिः पक्ष इवास्य । वाताश्वे हारा० ।

**भूमिपति** पु० ६त० । भूपतौ भूमिनाथादयोऽप्यत्र ।

**भूमिपिशाच** पु० भूमौ पिशाच इव । तालवृक्षे जटा० ।

**भूमिपुत्र** पु० ६त० । १मङ्गलग्रहे २नरकासुरे च भूमिपुत्रादयोऽप्यत्र । ३जानक्यां स्त्री गौरा० ङीष् ।

**भूमिप्रविभाग** पु० सुश्रुतोक्ते औषधार्थभूमिविभागे "अथातो भूमिप्रविभागविज्ञानीयमध्यायं व्याख्यास्यामः । श्वभ्रशर्कराश्मविषमवल्मीकश्मशानाऽऽघातनदेवतायतनसिकताभिरनुपहतामनूषरामभङ्गुरामदूराद्रिकां स्निग्धां प्ररोहवतीं मृद्वीं स्थिरां समां कृष्णां गौरीं लोहितां वा भूमिमौषधार्थं परीक्षेत तस्यां जातमपि कृमिविषशस्त्रातपपवनदहनतोयसम्बाधमार्गैरनुपहतमेकरसं पुष्टं पृथ्ववगाढमूलमुदीच्यां चौषधमाददीतेत्यौषधभूमिपरीक्षाविशेषः सामान्यः । विशेषतस्तु । तत्राश्मवती स्थिरा गुर्वी श्यामा कृष्णा वा स्थूलवृक्षशस्यप्राया स्वगुणभूयिष्ठा । स्निग्धा शीतलाऽऽसन्नोदका स्निग्धशस्यतृणकोमलवृक्षप्राया शुक्लाऽम्बुगुणभूयिष्ठा । नानावर्णा लघ्वश्मवती प्रविरलाल्पपाण्डुवृक्षप्ररोहाऽग्निगुणभूयिष्ठा । रूक्षा भस्मरासभवर्णा तनुरूक्षकोटराल्परसवृक्षप्रायाऽनिलगुणभूयिष्ठा । मृद्वी समा श्वभ्रवत्यव्यक्तरसजला सर्वतोऽसारवृक्षा महापर्वतवृक्षप्राया श्यामा चाकाशगुणभूयिष्ठा । तत्र केचिदाहुराचार्य्याः प्रावृड्वर्षाशरद्धेमन्तवसन्तग्रीष्मेषु यथासंख्यं मूलपत्रत्वक्क्षीरसारफलान्याददीतेति तत्तु न सम्यक् कस्मात् सौम्याग्नेयत्वाज्जगतः । सौम्यान्यौषधानि सौम्येष्वृतुष्वाददीताग्नेयान्याग्नेयेष्वेवमव्यापन्नगुणानि भवन्ति । सौम्यान्यौषधानि सौम्येष्वृतुषु गृहीतानि सोमगुणभूयिष्ठायां भूमौ जातान्यतिमधुरस्निग्धशीतानि जायन्ते । एतेन शेषं व्याख्यातम् । तत्र पृथिव्यम्बुगुणभूयिष्ठायां भूमौ जातानि विरेचनद्रव्याण्याददीताग्न्याकाशमारुतगुणभूयिष्ठायां वमनद्रव्याणि । उभयगुणभूयिष्ठायामुभयतोभागानि । आकाशगुणभूयिष्ठायां संशमनान्येवं बलवत्तराणि भवन्ति । सर्वाण्येव चाभिनवान्यन्यत्र मधुघृतगुडपिप्पलीविडङ्गेभ्यः । सर्वाण्येव सक्षीराणि वीर्य्यवन्ति तेषामसम्पत्तावनतिक्रान्तसंवत्सराण्याददीतेति । भवन्ति चात्र । गोपालास्तापसा व्याधा ये चान्ये वनचारिणः । मूलाहाराश्च ये तेभ्यो भेषजव्यक्तिरिष्यते । सर्वावयवसाध्येषु पलाशलवणादिषु । व्यवस्थितो न कालोऽस्ति तत्र सर्वो विधीयते । गन्धवर्णरसोपेता षड्विधा भूमिरिष्यते । तस्माद्भूमिस्वभावेन वीजिनः षड्रसैर्युताः । अव्यक्तः किल तोयस्य रसो निश्चयनिश्चितः । रस एव स चाव्यक्तो भूमेरेव रसाद्भवेत् । सर्वलक्षणसम्पन्ना भूमिः साधारणी स्मृता । द्रव्याणि यत्र तत्रैव तद्गुणानि विशेषतः । विगन्धेनापरामृष्टमविपन्नं रसादिभिः । नवं द्रव्यं पुराणं वा ग्राह्यमेव विनिर्दिशेत् । विडङ्गं पिप्पली क्षौद्रं सर्पिश्चाप्यनवं हितम् । शेषमन्यत्त्वभिनवं गृह्णीयाद्दोषवर्जितम् । जङ्गमानां वयःस्थानां रक्तरोमनखादिकम् । क्षीरमूत्रपुरीषाणि जीर्णाहारेषु संहरेत् । प्लोतमृद्भाण्डफलकशङ्कुविन्यस्तभेषजम् । प्रशस्तायां दिशि शुचौ भेषजागारमिष्यते ।"